IJEASM
International Journal of Engineering Applied Science and Management
ISSN (Online): 2582-6948
Vol. 5 Issue 9, September 2024

# महाकविकालिदासस्य दार्शनिकं चिन्तनम्

रिंकु सरकार
शोधार्थी, डा0 बालकृष्णा प्रजापति ,एसोसिएट प्रोफेसर (संस्कृत विभाग)
चौधरी चरण सिंह वि  वविद्यालय, मेरठ, उ.प्र.

*संस्कृतसाहित्यं वेदादारभ्य लौकिकं यावत् जगतः सकलकल्याणं प्रति अभिप्रेरयति। साहित्यं न केवलं मनोरञ्जनाय भवति अपितु मानवमनसः अन्तश्चेतनामुद्भावयितुं नितराम् अपूर्वां भूमिकामावहति। आदिकालादेव दार्शनिकं चिन्तनम् उपनिषद्भूतम् आसीत्। उपनिषत्सु ऋषिभिः उपनिषद्भूतं परमं ज्ञानम् अत्यन्तं सूक्ष्मरूपेण अबोधि। इदं हि मानवमनोगतमान्तरिकं विज्ञानं दर्शनरूपेण दार्शनिकैः लोके परिचीयते। महाकविकालिदासस्य काले दर्शनशास्त्रं पूर्णरूपेण विकसितमासीत्। दुःखत्रयविघाताय दर्शनशास्त्रमिव साहित्यमपि उन्मुखावस्थायां स्वकीयमवदानं प्रस्तावयति। वस्तुतः कवयः परदुःखवेदिनः भवन्ति। यतो हि अदिकविवाल्मीकिना क्रौञ्चविरहाकातरक्रोञ्च्याः शोकजनितश्लोक एव काव्यरूपेण प्राथम्येन प्रकटितम्।*

महाकविकालिदासोअपि न्याय–वैशेषिक – मीमांसा–प्रत्यभिज्ञादिदर्शनैः प्रभावितो प्रतिभाति। काश्मीरशैवदर्शनस्य प्रभावः कालिदासकाव्येषु अधिकं दृश्यते। प्रायेण कालिदासेन शिवः एव मधैंलपद्येषु कादाचिद् अभिज्ञाने अष्टमूर्तिरूपेण, कुत्राचित् जगतः पितृरूपेण, कस्मिंश्चित् हिमालयादिवर्णनरूपेण शिवाराधनं व्यधयि।

**दृश्यते जायते वा (आत्मा) ज्ञानप्राप्तिर्विधीयते इति दर्शनम्।**

भगवतः विश्वरूपदर्शनपरिप्रेक्ष्ये इदं कार्यं दर्शनशास्त्रान्तरगतनिहितमस्ति।

**“दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्” करुणा (स यान्ति दयमानाः, अभिज्ञानशावुफन्तलम्)**

असौ प्रसधैंः कालिदासस्य दार्शनिकचिन्तनस्य आधररूपेण स्वीकर्तुं शक्यते। योगदर्शनअपि अस्य समर्थनम् अभिलक्ष्यते।

“त्वया पत्रातया लतासनाथं इवायं वेफसरवृक्षकः प्रतिभाति” अस्मिन् प्रसधैं महाकविः सांख्यदर्शनाभिमतप्रकृतिरूपेण शकुन्तलाम् अथ च वृक्षं पुरूषरूपेण प्रस्तौति। सांख्यदर्शने पुरूषलक्षणे अस्य व्याप्तिः सम्भवति–

**“साक्षित्वमस्य पुरूषस्य”**

भगवतः श्रीरामचन्द्रस्य चरित्रां सीताभावाभावात् एकाकीरूपेण एवञ्च अन्यरघुवंशीयाणां नृपाणां चरितं मीमांसादर्शनानुरूपमेव प्रतीयते–

**“फलानुमेया प्रारम्भा संस्कारा प्राक्तना इव”**

इत्यस्य आधरोअपि मीमांसादर्शनमेव–

**"संस्कारसामर्थ्याद् गुणसंयोगाच्च"** इति परिपुष्टो भवति महाकवि– कालिदासरचिते विक्रमोर्वशीये मघैंलपद्ये **"वेदान्तेषु यमाहुरेकपुरुषं व्याप्यस्थितं रोदसि"** सदानन्दर्षेः कथनस्य समर्थनं रामानुजाचार्यस्य वेदान्ततत्वसारे एकमत– मघैंकरोति। महाकवेः मघैंलाचरणे "एकपुरुषम्" इत्यस्य कथनं छान्दोग्योपनिषदः "शाण्डिल्य विद्यायाः" तथा च "व्याप्यस्थितं रोदसि" इति तस्याः एव उपनिषदः दरहविद्यायाः स्मरणं कारयति। अत्रा प्रयुक्तो पुरुषशब्दोअपि सांख्यशास्त्रास्य पुरुषत्वं स्मारयति। व्याप्यस्थितमिति ऋग्वेदस्य पुरुषसूक्तमनुवर्तयति–

**"सहस्त्राशीर्षा पुरुषः सहस्त्राक्षः........."**

**श्वेताश्वतरोपनिषद्** (6/10) तमे मन्त्रो असौ भावः अभिव्यक्तः वर्तते। ईश्वरशब्दाऽत्र न्यायविचारधराप्रतिपादको वर्तते। **"ईश्वरकारणं पुरुषं"** सृष्टिनिर्माणे ईश्वरस्य सत्ता न्यायशास्त्रोणाधैंकृता वर्तते। अत्र 'स्थाणु' इति प्रत्यभिज्ञादर्शनस्य अभिमतं प्रकटयति। यतोहि यस्याअधराअपि **"सर्वकारिकामये स्थाणुस्तिष्ठति ये न सः"** इत्यस्य व्युत्पत्तिरपि अमुमेवार्थं समर्थयति। महाकविना स्थिरभक्ति– कामनाअधैंकृता वर्तते। या रामानुजाचार्याभिमता **"तैलधरावद् अविच्छिन्नभक्तिः"** इमां श्रेयस्करीं भक्तिं प्रतिपादयति।

वैशेषिकमते **"येनाभ्युदयनिःश्रेयस्सिद्धिः स धर्म"** **महाकविकालिदासस्य दार्शनिकं चिन्तनम्** लक्षणानुगतमेव रघुकुलोद्भवानां नृपाणां (रघुवंशम्–14/67) मनुना वर्णाश्रम– धर्मप्रतिपादकत्वात् एव गीतायाः **"यदा यदा हि र्धमस्य"** इत्युपदेशं कालिदासः अभिज्ञाने दुष्यन्तमुखेन प्रस्तापयति– **"राज्ञो धर्माधिकारे नियुक्तः"** (अभिज्ञान शा.–1/पृ–73) एतादृशैः बहुभिरूपदेशैः गीतायाः दार्शनिकविचाराणां प्रकटने कालिदासः अत्यन्तं निपुणो वर्तते। नृपाणां यज्ञकार्यं महाकविना धर्मकार्यरूपेण निरूपणं कृतमस्ति। **"दुदोह गां स यज्ञाय"** इति। इदमेव कार्यं मीमांसादर्शने धर्मकार्यरूपेणाऽभिहितमस्ति। महाकविना सम्पूणाऽपि ब्रह्माण्डः एकस्य ईश्वरस्य कृतिरूपेणाधैंकतोऽस्ति। एतस्मादेव महाकविः प्रकृतेः मानविकचित्रचित्रणे स्वकीयं वैदग्ध्यम् आदधाति। एतस्मादेव महाकवेः पात्रौः सह प्रकृतिरपि सुखदुःखयोः सहभागितां प्रस्तूय अद्वितीयं स्थानम् आवहति।

**"नृत्यं मयूराः वुफसुमानि वृक्षा दर्भानुपातान"**

सीतायाः दुःखेन दुःखितैः मयूरैः नर्तनम् कुसुमैः विकसनम्, वृक्षैः वद्भ्यादित्यागः, प्रकृतेः सुखदुःखयोः अनुभववेदितां प्रस्तूयते।

**"तत्त्वमसि"** महावाक्यस्य अवधरणाऽपि अनेन श्लोकेन परिलक्षिताऽस्ति। अस्य समर्थनम् वेदस्य ऋग्भिरपि असावेवार्थो प्रस्फुटितो भवति।

**"पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्"** इमानि तत्वानि महाकविना सांख्यप्रत्यभिज्ञादर्शनयोः आहूतानि सन्ति। तस्मादेव महाकविना भगवतः शिवस्य आराधनम् अष्टप्रकृत्युपादाननिर्मितमूर्त्युपदिष्टमस्ति।

IJEASM
International Journal of Engineering Applied Science and Management
ISSN (Online): 2582-6948
Vol. 5 Issue 9, September 2024

**“या सृष्टिः स्त्रष्टुराद्या”**

एष भावो महाकविना रघुवंशमहाकाव्येऽपि प्रास्तावि– **“अवेहि मां विंफकरष्टमूर्ते वुफम्भोदरं नाम निकुम्भमित्राम्।”**

महाकविना जैनदर्शनस्य उल्लेखः कुत्राऽपि न उल्लिखितः, परञ्च बौद्धदर्शनस्य दिङ्मात्रं मालविकाग्निमित्रो वर्णनं प्रस्तुतोऽस्ति। कालिदासोत्तरं महाकविशूद्रकेन मृच्छकटिकाख्ये प्रकरणे बाद्धभिक्षूणां हास्यावस्था प्रस्तुता वर्तते। मृच्छकटिकं कालिदासोत्तरं बौद्धधर्मस्य ह्रासकाले लिखितो ग्रन्थोऽस्ति।

कालिदासेन शृघैंरस्य षड्ऋतुषु वर्णनत्वात् चार्वाकपरम्परा परिचायिता। यतोहि यजुर्वेदानुसारेण ऋतवः पितृणां प्रतीकरूपेण भवन्ति। न एतावन्मात्रमेव अग्निमित्रनामके नाटके अग्निसदृशस्य नायकस्य संयोग–शृघैंरिकं वर्णनमपि महाकावेः चार्वाकमतानुगतत्वं प्रकटयति। मालविकाग्निमित्रे राज्ञः युद्घाय पुत्रस्य सम्प्रेषणमपि तस्य चार्वाकानुयायितां प्रस्तौति। यस्मात् तस्य नायकोन्नतता न्यूनगुणशालितां प्रकटयति।

कालिदासेन स्वकीयेषु काव्येषु वेदान्तवादिनां “माया” बौद्धमाध्यमिकानां “शून्यम्” प्रत्यभिज्ञादार्शनिकानां “परमशिवतत्त्वं” विशेषरूपेण स्मारितोऽस्ति। तेन सर्वेष्वपि काव्येषु अस्य परिचयः ग्रन्थादौ मघैंलाऽभिधाने एव कारितोऽस्ति। स्वकीये अभिज्ञानशाकुन्तलाख्ये नाटके अन्तिमो लक्ष्यः मोक्षः अपि याचितोऽस्ति। यश्च दर्शनशास्त्रास्य चरमलक्ष्यो भवति।

**“ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः”**

महाकवेः दार्शनिकमनुचिन्तनं विचार्य एतद्वक्तुं शक्यते यत् ऋतुसंहारः कुमारसम्भवम् च प्रारम्भिकरचनाश्रेण्यां सम्भवतः। मालविकाग्निमित्राम्, विक्रमोर्वशीयम्, मेघदूतम्, अभिज्ञानशाकुन्तलम्, रघुवंशम् च तेषां अनन्तरवर्तीनि काव्यानि सन्ति। यतोहि पश्चाद्रचितासु रचनासु तेषां दार्शनिकी परिपक्वता स्पष्टं स्फुटति। अतः एव महाकाविकालिदासः स्वकीये साहित्ये दार्शनिकचिन्तनं कदाचित् स्फुटरूपेण कदाचिच्च अस्फुटरूपेण अभिव्यनक्ति। दर्शनं विना कवितायां कवित्वभावाभावो एव। दर्शनशास्त्रं मानवस्य अन्तश्चेतनायाः तद्रूपो वर्तते यदृषिभिः अनादिकालादनवच्छिन्नानुभवः सूत्ररूपेण सर्वशास्त्रोपकाराय उपदिष्टः। येन विना चित्तस्य परमविश्रान्तिः कथमपि न सम्भवति। वस्तुतः कविः त्रिकालावाधितज्ञानेन अभिप्रेरितो भूत्वा स्वप्रतिभोन्मेषेण यत्किमपि वाग्रूपेण प्रस्तापयति तत् सर्वम् असामान्यं ज्ञानं भवति। यद्यदावश्यकं भवति तत् सर्वं कवेः वाचमनुवर्तते। उक्तञ्च उत्तररामचरिते भवभूतिना–

**“ऋषीणां पुनराद्यानां वाचमर्थोऽनुधवति”** इति।

## सन्दर्भग्रन्थाः–

1. रघुवंशम्– 14/67
2. अभि. पृ.– 73
3. रघुवंशम्– 14/69
4. आ0 शा0– 1/1
5. रघुवंशम् 2/32
6. सां. का – 13
7. मी– मा–10/3/21

IJEASM
International Journal of Engineering Applied Science and Management
ISSN (Online): 2582-6948
Vol. 5 Issue 9, September 2024

8. ऋगवेद– 10/90/1
9. श्वे. उ.– 6/10
10. न्य. द– 4/1/19
11. वै.द. 1/1